योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ००७

भुशुण्ड उवाच ।

ततस्तस्य मया ब्रह्मंस्तच्छ्रुत्वा पावनं वचः ।

इदमुक्तं यथापृष्टं सुस्पष्टपदया गिरा ।। १

साधु विद्याधराधीश दिष्ट्या बुद्धोऽसि भूतये ।

भवान्धकूपकुहराच्चिरेणोत्थानमिच्छसि ।। २

पावनीयं तव मती राजते घनरूपिणी ।

विवेकेनानलेनेव कनकद्रवसंततिः ।। ३

उपदेशगिरामर्थमादत्ते हारिहेलया ।

मुकुरे निर्मले द्रव्यमयत्नेनैव बिम्बति ।। ४

यदिदं वच्मि तत्सर्वमोमित्यादातुमर्हसि ।

अस्माभिश्चिरमन्विष्टं नात्र कार्या विचारणा ।। ५

यत्किंचित्स्वदतेऽन्तस्ते बुध्यस्वाबोधमुत्सृजन् ।

नासि त्वं चिरमप्यन्तः प्रेक्षितोऽपि न लभ्यसे ।। ६

नाहंत्वमस्ति न जगदिति निश्चयिनस्तव ।

सर्वमस्ति शिवं तच्च न दुःखाय सुखाय ते ।। ७

किमज्ञत्वाज्जगज्जातं जगतोऽथ किमज्ञता ।

विचार्यापीति नो विद्म एकत्वादलमेतयोः ।। ८

मृगतृष्णाम्बुवद्विश्वमवस्तुत्वात्सदप्यसत् ।

यश्चेदं भाति तद्ब्रह्म न किंचित्किंचिदेव वा ।। ९

मृगतृष्णाम्बुवद्विश्वं नास्ति त्वमथवास्ति च ।

प्रतिभासोऽपि नास्त्यत्र तदभावादतः शिवम् ।। 6.2.7.१०

विश्वबीजमहंत्वं त्वं विद्धि तस्माद्धि जायते ।

साद्र्यब्ध्युर्वीनदीशादिजगज्जरठपादपः ।। ११

अहंत्वबीजादणुतो जायतेऽसौ जगद्द्रुमः ।

तस्येन्द्रियरसाढ्यानि मूलानि भुवनानि हि ।। १२

तारकाजालकलिका ऋक्षौघः कोरकोत्करः ।

वासनागुच्छविसराः पूर्णचन्द्रः फलालयः ।। १३

स्वर्गादयो बृहद्वर्गा महाविटपकोटराः ।

मेरुमन्दरसह्यादिगिरयः पत्रराजयः ।। १४

सप्ताब्धयोऽग्रसुतयः पातालं मूलकोटरम् ।

युगानि घुणवृन्दानि पर्वाणि गुणपङ्क्तयः ।। १५

अज्ञानमुत्पत्तिमही नरा विहगकोटयः ।

उपलम्भो बृहत्स्तम्भो दवो निर्वाणनिर्वृतिः ।। १६

रूपालोकमनस्कारा विविधामोदवृत्तयः ।

वनं विपुलमाकाशं शुक्तिजालं मुखत्वचः ।। १७

विचित्रशाखा ऋतव उपशाखा दिशो दश ।

संविद्रसमहापूरो वातस्पन्दो निवर्तनः ।। १८

चन्द्रार्करुचयो लोला मज्जनोन्मज्जनोन्मुखाः ।

रम्याः कुसुममञ्जर्यस्तिमिरं भ्रमरभ्रमः ।। १९

पातालमाशागणमन्तरिक्ष-

मापूर्य तिष्ठत्यसदेव सद्वत् ।

तस्यानहन्ताग्निहतेऽहमर्थ-

बीजे पुनर्नास्ति सतोऽपि रोहः ।। 6.2.7.२०

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मोक्षो० निर्वाणप्रकरणे उत्त० विद्याधरोपाख्याने जगद्वृक्षबीजवर्णनं नाम सप्तमः सर्गः ।।७।।